# CHINMAYA MISSION WASHINGTON REGIONAL CENTER
# CHINMAYA SOMNATH



***VEDIC ARATI***

ōm̐ hariḥ ōm̐ || śrī gurubhyō namaḥ || hariḥ ōm̐ ||
|| śrī cinmaya sōmanāthāya namaḥ ||
ōm̐ hara hara namaḥ pārvati-patayē,
**harahara mahādēva |**
ōm̐ dēva dēvōttama, dēvatāsārvabhauma, akhilāṇḍakōṭi brahmāṇḍanāyaka, śrī gaṅgā samēta, śrī cinmaya sōmanātha svāminē namaḥ |
mantrapuṣpāṇi samarpayāmi ||
ōm̐ yōऽpām puṣpam vēda |
**puṣpavān prajāvān paśumān bhavati |**
candramā vā apām puṣpam |
**puṣpavān prajāvān paśumān bhavati |**
ya ēvam vēda | **yōऽpāmāyatanam vēda |**
āyatanavān-bhavati | hariḥ ōm̐ ||
**svasti prajābhyaḥ paripālayantām |**
**nyāyyēna mārgēṇa mahīm mahīśāḥ ||**
**gōbrāhmaṇēbhyaḥ śubhamastu nityam |**
**lōkāḥ samastāḥ sukhinōḥ bhavantu |**
**kālē varṣatu parjanyaḥ | pṛthivīsasyaśālinī ||**
**dēśōऽyam kṣōbharahitaḥ | brāhmaṇāssantu nirbhayāḥ ||**
ōm̐ mahadbhyō namaḥ | svāminaḥ |
bhavantassarvē śṛṇvantu |
svastimantrārthāḥ, satyāḥ, saphalāssantu iti mahāntōऽnugṛhnantu | **tathāstu |**
ōm̐ asya dēvadēvasya, mahādēvasya, akhilāṇḍa-kōṭi brahmāṇḍa-nāyakasya, dēva-dēvōttamasya, dēvatā-sārva-bhaumasya, sakalaniṣkala-svarūpasya, ṣaḍ-trimśat-tattvātītasya, sarvajñatva, sarvēśvaratva, sarvāntaryāmitva, sarvasṛṣṭratva, sarvabhōktṛtva, sarva-samhārakatva, sarva-vyāpakatva, sarva-śaktimatvādi-guṇagaṇa-vibhūṣitasya, vēdānta-vēdyasya, pārvatī-nāthasya, ṛṣabhavāhanārūḍhasya, kailāsaśikhara-nivāsasya, nandī, bhṛṅgī, caṇḍakuṇḍōdara patañjalī, vyāghrapāda-vināyaka-ṣaṇmukhādyaiḥ, sakala-pramathagaṇa sēvita-sēvyamānasya, lōkānugraha-kārakasya, bhaktānugraha-varadasya, bhagavataḥ, śrī gaṅgā samēta, śrī cinmaya sōmanātha svāminaḥ,nityapūjā, abhiṣēka, alaṅkāra, naivēdya, dīpārādhana karmaṇi-madhyē, yatkiñcit, mantralōpē, tantralōpē, kriyālōpē, śaktilōpē, śraddhālōpē, kālalōpē, niyamalōpē, naivēdyādi-vihitalōpē ca, yad vaiguṇyam jātam tat sarvam bhagavad kṛpayā,yathāprōktam, yathā-śāstrānuṣṭhitam, bhagavat-prītikaram bhūyāditi mahāntōऽnugṛhnantu | **tathāstu |**
sarvē janāḥ, sukhinō bhavantu | **tathāstu|**
sarvam samastam sanmaṅgalamastu | **tathāstu|**
asya dharmasya uttarōttarābhivṛddhirastu | **tathāstu|**
rājā dhārmikō vijayī bhavatu | **tathāstu|**
dēśōऽyam nirupadravōऽstu | **tathāstu|**
satyā ētā āśiṣaḥ santu | **tathāstu|**
ōm̐ nidhanapatayē namaḥ | **nidhana-patāntikāya namaḥ |**
ūrdhvāya namaḥ | **ūrdhva-liṅgāya namaḥ |**
hiraṇyāya namaḥ | **hiraṇya-liṅgāya namaḥ |**
suvarṇāya namaḥ | **suvarṇa-liṅgāya namaḥ |**
divyāya namaḥ | **divya-liṅgāya namaḥ |**
bhavāya namaḥ| **bhava-liṅgāya namaḥ |**
śarvāya namaḥ | **śarva-liṅgāya namaḥ |**
śivāya namaḥ | **śiva-liṅgāya namaḥ |**
jvalāya namaḥ | **jvala-liṅgāya namaḥ |**
ātmāya namaḥ | **ātma-liṅgāya namaḥ |**
paramāya namaḥ | **parama-liṅgāya namaḥ |**
ētathsōmasya sūryasya sarvaliṅgaggsthāpayati pāṇimantram pavitram ||
**sadyōjātam prapadyāmi sadyōjātāya vai namō namaḥ |**
bhavē bhavē nātibhavē bhavasva mām |
**bhavōdbhavāya namaḥ ||**
**vāmadēvāya namō jyēṣṭhāya namaśśrēṣṭhāya namō rudrāya namaḥ kālāya namaḥ kalavikaraṇāya namō balavikaraṇāya namō balāya namō balapramathanāya namassarva-bhūtadamanāya namō manōnmanāya namaḥ ||**
**aghōrēbhyōऽtha ghōrēbhyō ghōraghōratarēbhyaḥ | sarvēbhya-ssarvaśarvēbhyō namastē astu rudrarūpēbhyaḥ ||**
tatpuruṣāya vidmahē mahādēvāya dhīmahi |
**tannō rudraḥ pracōdayāt ||**
**īśānaḥ sarva-vidyānām-īśvaraḥ sarva-bhūtānām brahmāऽdhipati-rbrahmaṇōऽdhipatir-brahmā śivō mē astu sadāśivōm ||**
**namō hiraṇyabāhavē hiraṇyavarṇāya hiraṇyarūpāya hiraṇyapatayē ambikāpataya umāpatayē paśupatayē namō namaḥ ||**
ōm̐ hara hara namaḥ pārvati-patayē,
**harahara mahādēva ||**
**ōm rājādhirājāya prasahyasāhinē |**
**namō vayam vai śravaṇāya kurmahē |**
**sa mē kāmānkāma kāmāya mahyam |**
**kāmēśvarō vai śravaṇō dadātu |**
**kubērāya vai śravaṇāya | mahārājāya namaḥ ||**
**ōm̐ na karmaṇā na prajayā dhanēna tyāgēnaikē amṛtatvamānaśuḥ |**
**parēṇa nākam nihitam guhāyām vibhrājadētadyatayō viśanti | vēdānta vijñāna suniścitārthā-ssamnyāsa yōgādyatayaśśuddha-sattvāḥ | tē brahmalōkētu parāntakālē parāmṛtāt-parimucyanti sarvē |**
**dahram vipāpam paramēśma bhūtam yat puṇḍarīkam puramadhya saggstham | tatrāpi dahram gaganam viśōka-stasmin yadantasta-dupāsitavyam | yō vēdādau svara: prōktō vēdāntē ca pratiṣṭhitaḥ | tasya prakṛti līnasya ya: parassa mahēśvaraḥ |**
**na tatra sūryō bhāti na candratārakam,**
**nēmā vidyutō bhānti kutōऽyamagniḥ |**
**tamēva bhāntamanubhāti sarvam,**
**tasya bhāsā sarvamidam vibhāti ||**
ōm̐ hara hara namaḥ pārvati-patayē,
**hara hara mahādēva ||**



|| śrī gaṅgāstōtram ||

dēvi surēśvari bhagavati gaṅgē tribhuvanatāriṇi tarala taraṅgē |
śaṅkara maulivihāriṇi vimalē mama mati rāstāṁ tava pada kamalē || 1 ||

bhāgīrathi sukhadāyini mātaḥ tava jalamahimā nigamē khyātaḥ |
nāhaṁ jānē tava mahimānaṁ pāhi kr̥pāmayi māmajñānam || 2 ||

hari pada pādya taraṅgiṇi gaṅgē himavidhumuktā-dhavalataraṅgē
dūrīkuru mama duṣkr̥ti bhāraṁ kuru kr̥payā bhava-sāgara pāram || 3 ||

tava jalamamalaṁ yēna nipītaṁ paramapadaṁ khalu tēna gr̥hītam
mātargaṅgē tvayi yō bhaktaḥ kila taṁ draṣ-ṭuṁ na yamaḥ śaktaḥ || 4 ||

patitōddhāriṇi jāhnavi gaṅgē khaṇḍita girivaramaṇḍita bhaṅgē |
bhīṣma-janani hē munivarakanyē patita-nivāriṇi tribhuvana dhanyē || 5 ||

kalpalatāmiva phaladāṁ lōkē praṇamati yastvāṁ na patati śōkē |
pārā-vāra-vihāriṇi gaṅgē vimukhayuvati kr̥ta-taralā-pāṅgē || 6 ||

tava cēnmātaḥ srōtaḥ snātaḥ punarapi jaṭharē sōpi na jātaḥ |
naraka-nivāriṇi jāhnavi gaṅgē kaluṣa-vināśini mahimōttuṅgē || 7 ||

punarasadaṅgē puṇyataraṅgē jaya jaya jāhnavi karuṇāpāṅgē |
indramukuṭamaṇi-rājitacaraṇē sukhadē śubhadē bhr̥tyaśaraṇyē || 8 ||

rōgaṁ śōkaṁ tāpaṁ pāpaṁ hara mē bhagavati kumati kalāpam |
tribhuvanasārē vasudhāhārē tvamasi gatirmama khalu saṁsārē || 9 ||

alakānandē paramānandē kuru karuṇāmayi kātaravandyē |
tava taṭa nikaṭē yasya nivāsaḥ khalu vaikuṇṭhē tasya nivāsaḥ || 10 ||

varamiha nīrē kamaṭhō mīnaḥ kiṁ vā tīrē śaraṭaḥ kṣīṇaḥ |
athavā śvapacō malinō dīnaḥ tava na hi dūrē nr̥patikulīnaḥ || 11 ||

bhō bhuvanēśvari puṇyē dhanyē dēvi dravamayi munivarakanyē |
gaṅgāstavamimamamalaṁ nityaṁ paṭhati narō yaḥ sa jayati satyam || 12 ||

yēṣāṁ hr̥dayē gaṅgā bhaktiḥ tēṣāṁ bhavati sadā sukhamuktiḥ |
madhurākāntā pañjhaṭikābhiḥ paramānandakalita lalitābhiḥ || 13 ||

gaṅgāstōtramidaṁ bhavasāraṁ vāñchita-phaladaṁ vimalaṁ sāram |
śaṅkara-sēvaka śaṅkara racitaṁ paṭhati sukhī stava iti ca samāptaḥ
śaṅkara-sēvaka śaṅkara racitaṁ paṭhati sukhī stava iti ca samāptaḥ ||14 ||

jaya jaya gaṅgē jaya hara gaṅgē jaya jaya gaṅgē jaya hara gaṅgē |
jaya jaya gaṅgē jaya hara gaṅgē jaya jaya gaṅgē jaya hara gaṅgē ||

bōliyē śrī gaṅgā mayyā ki jay |
ōṁ hara hara namaḥ pārvati-patayē hara hara mahādēva ||
śrī sad-gurunātha mahārāja kī jai ||

# CHINMAYA MISSION WASHINGTON REGIONAL CENTER
# CHINMAYA SOMNATH



*VEDIC ARATI*

ॐ हरिः ॐ ॥ श्री गुरुभ्यो नमः ॥ हरिः ॐ ॥

॥ श्री चिन्मय सोमनाथाय नमः ॥

ॐ हर हर नमः पार्वति-पतये, **हरहर महादेव ।**

ॐ देव देवोत्तम, देवतासार्वभौम, अखिलाण्डकोटि ब्रह्माण्डनायक,

श्री गङ्गा समेत, श्री चिन्मय सोमनाथ स्वामिने नमः ।

मन्त्रपुष्पाणि समर्पयामि ॥

ॐ योऽपां पुष्पं वेद । **पुष्पवान् प्रजावान् पशुमान् भवति ।**

चन्द्रमा वा अपां पुष्पम् । **पुष्पवान् प्रजावान् पशुमान् भवति ।**

य एवं वेद । **योऽपामायतनं वेद ।**

आयतनवान्-भवति । हरिः ॐ ॥

**स्वस्ति प्रजाभ्यः परिपालयन्ताम् । न्याय्येन मार्गेण महीं महीशाः ॥**

**गोब्राह्मणेभ्यः शुभमस्तु नित्यं । लोकाः समस्ताः सुखिनः भवन्तु ।**

**काले वर्षतु पर्जन्यः । पृथिवीसस्यशालिनी ॥ देशोऽयं क्षोभरहितः ।**

**ब्राह्मणास्सन्तु निर्भयाः ॥**

ॐ महद्भ्यो नमः । स्वामिनः । भवन्तस्सर्वे शृण्वन्तु ।

स्वस्तिमन्त्रार्थाः, सत्याः, सफलास्सन्तु इति महान्तोऽनुगृह्णन्तु ।

**तथास्तु ।**

ॐ अस्य देवदेवस्य, महादेवस्य, अखिलाण्ड-कोटि ब्रह्माण्ड-नायकस्य, देवदेवोत्तमस्य, देवता-सार्वभौमस्य, सकलनिष्कल-स्वरूपस्य, षड्त्रिंशत्-तत्त्वातीतस्य, सर्वज्ञत्व, सर्वेश्वरत्व, सर्वान्तर्यामित्व, सर्वसृष्टृत्व, सर्वभोक्तृत्व, सर्वसंहारकत्व, सर्वव्यापकत्व, सर्वशक्तिमत्वादि-गुणगण-विभूषितस्य, वेदान्तवेद्यस्य, पार्वतीनाथस्य, ऋषभवाहनारूढस्य, कैलासशिखर-निवासस्य, नन्दी, भृङ्गी, चण्डकुण्डोदर पतञ्जली, व्याघ्रपाद-विनायक-षण्मुखाद्यैः, सकल-प्रमथगण सेवित-सेव्यमानस्य, लोकानुग्रह-कारकस्य, भक्तानुग्रह-वरदस्य, भगवतः, श्री गङ्गा समेत, श्री चिन्मय सोमनाथ स्वामिनः, नित्यपूजा, अभिषेक, अलङ्कार, नैवेद्य, दीपाराधन कर्मणिमध्ये, यत्किञ्चित्, मन्त्रलोपे, तन्त्रलोपे, क्रियालोपे, शक्तिलोपे, श्रद्धालोपे, काललोपे, नियमलोपे, नैवेद्यादि-विहितलोपे च, यद् वैगुण्यं जातं तत् सर्वं भगवद् कृपया,यथाप्रोक्तं, यथा-शास्त्रानुष्ठितं, भगवत्-प्रीतिकरं भूयादिति महान्तोऽनुगृह्णन्तु । **तथास्तु ।**

सर्वे जनाः, सुखिनो भवन्तु । **तथास्तु ।**

सर्वं समस्तं सन्मङ्गलमस्तु । **तथास्तु ।**

अस्य धर्मस्य उत्तरोत्तराभिवृद्धिरस्तु । **तथास्तु ।**

राजा धार्मिको विजयी भवतु । **तथास्तु ।**

देशोऽयं निरुपद्रवोऽस्तु । **तथास्तु ।**

सत्या एता आशिषः सन्तु । **तथास्तु ।**

ॐ निधनपतये नमः । **निधनपतान्तिकाय नमः ।**

ऊर्ध्वाय नमः । **ऊर्ध्वलिङ्गाय नमः ।**

हिरण्याय नमः । **हिरण्यलिङ्गाय नमः ।**

सुवर्णाय नमः । **सुवर्णलिङ्गाय नमः ।**

दिव्याय नमः । **दिव्यलिङ्गाय नमः ।**

भवाय नमः। **भवलिङ्गाय नमः ।**

शर्वाय नमः। **शर्वलिङ्गाय नमः ।**

शिवाय नमः । **शिवलिङ्गाय नमः ।**

ज्वलाय नमः । **ज्वललिङ्गाय नमः ।**

आत्माय नमः । **आत्मलिङ्गाय नमः ।**

परमाय नमः । **परमलिङ्गाय नमः ।**

एतथ्सोमस्य सूर्यस्य सर्वलिङ्गग्ं स्थापयति पाणिमन्त्रं पवित्रम् ॥

**सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ।**

भवे भवे नातिभवे भवस्व माम् । **भवोद्भवाय नमः ॥**

**वामदेवाय नमो ज्येष्ठाय नमश्श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्व-भूतदमनाय नमो मनोन्मनाय नमः ॥**

**अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।** सर्वेभ्य-स्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

**तत्पुरुषाय विद्महे महादेवाय धीमहि ।** तन्नो रुद्रः प्रचोदयात् ॥

**ईशानः सर्व-विद्यानाम्-ईश्वरः सर्व-भूतानां ब्रह्माऽधिपति-ब्रह्मणोऽधिपति-ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥**

**नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतये अम्बिकापतय उमापतये पशुपतये नमो नमः ॥**

ॐ हर हर नमः पार्वति-पतये, **हरहर महादेव ॥**

**ॐ राजाधिराजाय प्रसह्यसाहिने । नमो वयं वै श्रवणाय कुर्महे ।**

**स मे कामान्काम कामाय मह्यम् । कामेश्वरो वै श्रवणो ददातु ।**

**कुबेराय वै श्रवणाय । महाराजाय नमः ॥**

**ॐ न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।**

**परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति ।**

**वेदान्त विज्ञान सुनिश्चितार्था-स्संन्यास योगाद्यतयश्शुद्ध-सत्त्वाः ।**

**ते ब्रह्मलोकेतु परान्तकाले परामृतात्-परिमुच्यन्ति सर्वे ।**

**दह्रं विपापं परमेश्म भूतं यत् पुण्डरीकं पुरमध्य सग्गस्थम् ।**

**तत्रापि दह्रं गगनं विशोक-स्तस्मिन् यदन्तस्त-दुपासितव्यम् ।**

**यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।**

**तस्य प्रकृति लीनस्य यः परस्स महेश्वरः ।**

**न तत्र सूर्यो भाति न चन्द्रतारकं, नेमा विद्युतो भान्ति कुतोऽयमग्निः ।**

**तमेव भान्तमनुभाति सर्वं, तस्य भासा सर्वमिदं विभाति ॥**

ॐ हर हर नमः पार्वति-पतये, **हर हर महादेव ॥**



**॥ श्री गङ्गास्तोत्रम् ॥**

देवि सुरेश्वरि भगवति गङ्गे त्रिभुवनतारिणि तरल तरङ्गे ।

शङ्कर मौलिविहारिणि विमले मम मति रास्तां तव पद कमले ॥ १ ॥

भागीरथि सुखदायिनि मातः तव जलमहिमा निगमे ख्यातः ।

नाहं जाने तव महिमानं पाहि कृपामयि मामज्ञानम् ॥ २ ॥

हरि पद पाद्य तरङ्गिणि गङ्गे हिमविधुमुक्ता–धवलतरङ्गे ।

दूरीकुरु मम दुष्कृति भारं कुरु कृपया भव–सागर पारम् ॥ ३ ॥

तव जलममलं येन निपीतं परमपदं खलु तेन गृहीतम् ।

मातर्गङ्गे त्वयि यो भक्तः किल तं द्रष्टुं न यमः शक्तः ॥ ४ ॥

पतितोद्धारिणि जाह्नवि गङ्गे खण्डित गिरिवरमण्डित भङ्गे ।

भीष्म–जननि हे मुनिवरकन्ये पतित–निवारिणि त्रिभुवन धन्ये ॥ ५ ॥

कल्पलतामिव फलदां लोके प्रणमति यस्त्वां न पतति शोके ।

पारा–वार–विहारिणि गङ्गे विमुखयुवति कृत–तरला–पाङ्गे ॥ ६ ॥

तव चेन्मातः स्रोतः स्नातः पुनरपि जठरे सोपि न जातः ।

नरक–निवारिणि जाह्नवि गङ्गे कलुष–विनाशिनि महिमोत्तुङ्गे ॥ ७ ॥

पुनरसदङ्गे पुण्यतरङ्गे जय जय जाह्नवि करुणापाङ्गे ।

इन्द्रमुकुटमणि–राजितचरणे सुखदे शुभदे भृत्यशरण्ये ॥ ८ ॥

रोगं शोकं तापं पापं हर मे भगवति कुमति कलापम् ।

त्रिभुवनसारे वसुधाहारे त्वमसि गतिर्मम खलु संसारे ॥ ९ ॥

अलकानन्दे परमानन्दे कुरु करुणामयि कातरवन्द्ये ।

तव तट निकटे यस्य निवासः खलु वैकुण्ठे तस्य निवासः ॥ १० ॥

वरमिह नीरे कमठो मीनः किं वा तीरे शरटः क्षीणः ।

अथवा श्वपचो मलिनो दीनः तव न हि दूरे नृपतिकुलीनः ॥ ११ ॥

भो भुवनेश्वरि पुण्ये धन्ये देवि द्रवमयि मुनिवरकन्ये ।

गङ्गास्तवमिमममलं नित्यं पठति नरो यः स जयति सत्यम् ॥ १२ ॥

येषां दये गङ्गा भक्तिः तेषां भवति सदा सुखमुक्तिः ।

मधुराकान्ता पञ्झटिकाभिः परमानन्दकलित ललिताभिः ॥ १३ ॥

गङ्गास्तोत्रमिदं भवसारं वाञ्छित–फलदं विमलं सारम् ।

शङ्कर–सेवक शङ्कर रचितं पठति सुखी स्तव इति च समाप्तः ॥ १४ ॥

जय जय गङ्गे जय हर गङ्गे जय जय गङ्गे जय हर गङ्गे ।

जय जय गङ्गे जय हर गङ्गे जय जय गङ्गे जय हर गङ्गे ॥

बोलिये श्री गङ्गा मय्या की जय् ।

ॐ हर हर नमः पार्वति–पतये हर हर महादेव ॥ श्री सद्–गुरुनाथ महाराज की जै ॥